## प्राणिरजतादिभ्योऽञ्। (१५४/१५३२)

प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्च अञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। [1]अणादीनामपवादः। अनुदात्तादेः अञ् विहित एव परिशिष्टमिहोदाहरणम्। प्राणिभ्यस्तावत्—कापोतम्। मायूरम्। तैत्तिरम्। [2]रजतादिभ्यः—राजतम्। सैसम्। लौहम्। रजतादिषु येऽनुदात्तादयः पठ्यन्ते रजतकण्टकारप्रभृतयस्तेभ्योऽञि सिद्धे पुनर्वचनं मयड्बाधनार्थम्।

रजत। सीस। लोह। उदुम्बर। [3]नीलदारु। [4]रोहितक। बिभीतक। पीतदारु। [5]तीव्रदारु। त्रिकण्टक। कण्टकार। रजतादिः॥

## ञितश्च तत्प्रत्ययात्। (१५५/१५३३)

अञ् इत्येव। तद् इति विकारावयवयोर[6]र्थयोः प्रत्ययवमर्शः। ञिद् यो विकारावयवप्रत्ययस्तदन्तात् प्रातिपदिकात् अञ् प्रत्ययो भवति विकारावयवयोः एव। मयटोऽपवादः। [7]'ओरञ्' (४.२.७१/१२८३), 'शम्याष्ट्लञ्' (४. ३. १४२/१५२२), 'प्राणिरजतादिभ्योऽञ्' (४. ३. १५४/१५३२), 'उष्ट्राद्वुञ्' (४. ३. १५७/१५३५), [8]'एण्या ढञ्' (४.३.१५९/१५३७), 'कंसीयपरशव्ययोर्यञञौ लुक्च' (४.३.१६८/१५४७) इत्येते प्रत्ययाः गृह्यन्ते। दैवदारवस्य विकारोऽवयवो वा दैवदारवम्। दाधित्थस्य दाधित्थम्। पालाशस्य पालाशम्। शामीलस्य शामीलम्। [9]कापोतस्य कापोतम्। औष्ट्रकस्य औष्ट्रकम्। ऐणेयस्य ऐणेयम्। कांस्यस्य कांस्यम्। [10]पारशवस्य पारशवम्। ञितः इति किम्? बैल्वमयम्। [11]तत्प्रत्ययात् इति किम्? बैदमयम्॥

## क्रीतवत् परिमाणात्। (१५६/१५३४)

[12]'प्राग्वतेष्ठञ्' (५.१.१८/१६८०) इत्यत[13] आरभ्य क्रीतार्थे ये प्रत्ययाः [14]परिमाणाद् [15]विहिताः, ते विकारेऽतिदिश्यन्ते। परिमाणात् क्रीत इव प्रत्यया भवन्ति तस्य विकारः इत्येतस्मिन् [16]विषये। अणादीनामपवादः। सङ्ख्या [17]अपि परिमाणग्रहणेन गृह्यते, न [18]रूढिपरिमाणमेव। निष्केण क्रीतं नैष्किकम्। [19]एवं निष्कस्य विकारो नैष्किकः। शतेन क्रीतं शत्यम्, शतिकम्। शतस्य विकारः शत्यः, शतिकः। साहस्रः। वतिः सर्वसादृश्यार्थः। 'अध्यर्धपूर्वाद् द्विगोर्लुगसञ्ज्ञायाम्' (५.१.२८/१६९३) इत्येवमादिक[20]मप्यतिदिश्यते। [21]द्विसहस्रः, द्विसाहस्रः। द्विनिष्कः, द्विनैष्किकः॥

## उष्ट्राद् वुञ्। (१५७/१५३५)

उष्ट्रशब्दाद् वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। प्राण्यञोऽपवादः। उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः॥

---

1. अणोऽपवादः फ. 2. रजतादिभ्यः—कण्टकारः नास्ति फ. 3. नीचदारु ब. 4. लोहितक ड. 5. वृद्धदारु इत्यधिकम् ब.क.ड. 6. अर्थयोः नास्ति ब. 7. ओरञ्–शामीलम् इति नास्ति फ. 8. एण्या ढञ् नास्ति ब. 9. राजतम् इत्यधिकम् ह. 10. पाराशवस्य पाराशवम् क. 11. मयट् प्रत्ययात् ह. 12. प्राग्वहतेष्ठञ् क.ड. 13. अतः नास्ति फ. 14. परिमाणेन क. 15. विध्यर्थमिष्यन्ते फ. 16. अर्थे ह. 17. च ब.ह. 18. रूढिः परिमाणमेव ड.क. 19. एवं नास्ति फ. 20. उपदिश्यन्ते फ. 21. द्विसहस्रकः द्वैनिष्किकः ड.